हिमसंस्कृतवार्ता:
दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

**पञ्चाङ्गम्**
अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ हेमन्तऋतुः
सूर्यदक्षिणायनम् पौषमासः शुक्लपक्षः नवमी
तिथिः पौष 25 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-3 ■ वर्ष-4 ■ अङ्क-69 | 1 | जनवरी 8, 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

2 HMPV VIRUS - हिमाचले एच.एम.पी.वी. विषाणोः कियत् संकटम्?



3 Mahakumbh 2025 : हरितमहाकुम्भे सहस्राधिकाः पर्यावरणसंरक्षणकार्यकर्तारः एकत्रिताः भविष्यन्ति

3 संस्कृतादेव बह्वीनां भाषाणाम् उत्पत्तिर्जाता- वाचस्पतिमिश्रः



## नेपाल-तिब्बतयोः सीम्नि सप्त दशमलव एकं तीव्रस्तरीयेन भूकम्पेन
### पञ्चनवतिजनाः मृत्युमुपगताः




हिमसंस्कृतवार्ताः । प्रातः काले नेपाल-तिब्बतयोः सीम्नि सप्त दशमलव एकं तीव्रस्तरीयेन भूकम्पेन पञ्चनवतिजनाः मृत्युमुपगताः तत्रैव त्रिशदधिकैकशतजनाः व्रणिताः अभवन्। अस्य भूकम्पस्य केन्द्रं नेपालसीम्नः समीपे तिब्बतस्य शिजांगस्थलम् आसीत्। येन हि बिहार-पश्चिमबङ्गाल-सिक्किमराज्यानि समेत्य उत्तरभारतस्य अनेकेषु भागेषु कम्पनम् जनैः अनुभूतम्।

## असम-दुर्घटना

असमप्रशासनेन दिमा-हसाओ-जनपदस्य उमराङ्गसो-नगरस्य कृष्णाङ्गार-आकरे अवरुद्धानां खनितृणां सहायतायै नौसैन्यबलस्य गाहितृन् तत्र नियोजयितुं सम्प्रार्थिताः। त्रिशतफुटपरिमिते जलप्लाविते रङ्गहील इत्यत्र कृष्णाङ्गार-आकरे एते खनितारः अवरुद्धास्सन्ति इति सूच्यते। सेनया राज्यापात्मोचनबल- राष्ट्रियापत्मोचन-बलाभ्यां सह संयुक्तरूपेण साहाय्योद्धारकार्याणि समारब्धानि ।

## केन्द्रीयकृषिकृषककल्याण-मन्त्रिणा शिवराजसिंह चौहानेन मिलितवन्तः कृषकाः



दिल्ल्याः कृषकाः नवदिल्ल्यां केन्द्रीयकृषिकृषककल्याणमन्त्रिणा शिवराजसिंह चौहानेन सह मेलनं कृतवन्तः। तदनु श्रीचौहानेन वार्ताहरैः सह सम्भाषयता उक्तं यत् केन्द्रप्रशासनस्य विभिन्नानां योजनानां लाभः राष्ट्रियराजधान्याः कृषकाः नैव प्राप्नुवन्ति तावत् एतस्मिन् सन्दर्भे दिल्ल्याः मुख्यमन्त्रिणं आतिशि इत्येतां प्रति एकं पत्रं विलिखितम्।

## दिल्ली-विधानसभा-निर्वाचनम् एकस्मिन्नेव चरणे
### फरवरीमासस्य पञ्चमे दिनाङ्के समनुष्ठास्यते - निर्वाचनायोगः

हिमसंस्कृतवार्ताः । दिल्ली-विधानसभा-निर्वाचनं एकस्मिन्नेव चरणे फरवरीमासस्य पञ्चमे दिनाङ्के समनुष्ठास्यते तत्रैव मतगणना अष्टमे दिनाङ्के निर्धारितास्ति। निर्वाचनायोगेन अद्य सप्तति-सदस्य-युतायाः दिल्लीविधानसभायाः निर्वाचनाय समुद्घोषणा कृता। अद्य नवदिल्ल्यां वार्ताहरान् संसूचयन् मुख्यनिर्वाचना-युक्तः राजीवकुमारः अकथयत् यत् सम्बद्धाधिसूचना अस्य मासस्य दशमे दिनाङ्के प्रख्यापयिष्यते। मुख्यनिर्वाचनायुक्तेन ईवीएम् यन्त्रसम्बद्धान् आरोपान् अपि निराकृताः।




## नागरिक-केन्द्रित- शासनं प्रति भारतस्य प्रतिबद्धतायै प्राधान्यम् प्रददाति पंचविंशत्यधिकद्विसहस्रतमवर्षीयः प्रारूपगत-आंककीय-वैयक्तिक-दत्तांश-संरक्षण-नियमः - प्रधानमन्त्री

हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी सूचितवान् यत् पञ्चविंशत्यधिकद्विसहस्रतमवर्षीयः प्रारूपगत-आङ्ककीय-वैयक्तिक-दत्तांश-संरक्षण-नियमः नागरिक-केन्द्रित- शासनं प्रति भारतस्य प्रतिबद्धतायै प्राधान्यम् प्रददाति। सूचनाप्रसारणमन्त्रिणः अश्विनी-वैष्णवस्य सन्देशस्य प्रत्युत्तरे श्रीमोदी अवधानं दत्तवान् यत् नियमानां उद्देश्यं वैयक्तिक-दत्तांशस्य रक्षणं भवति तथा च विकासस्य समावेशस्य च प्रोत्साहनं भवति इति।

## केन्द्रेण राज्यानि केन्द्रशासितप्रदेशाः भारतीय- नागरिक-सुरक्षा-संहितायाः उपबन्धानां प्रवर्तनाय निर्दिष्टम्




हिमसंस्कृतवार्ताः। केन्द्रेण राज्यानि केन्द्रशासितप्रदेशाः च त्रयोविंशत्यधिक-द्विसहस्र-तम्याः भारतीय- नागरिक-सुरक्षा-संहितायाः नवसप्तत्यधिक-चतुश्शत-परिच्छेदस्य उपबन्धानां प्रवर्तनाय निर्दिष्टम्, येन निगडितेभ्यः जनेभ्यः साहाय्यं भविष्यति। अयं प्रभागः अन्वीक्षार्थं प्रतीक्षमाणानां कारागारवासिनां सङ्ख्यां न्यूनीकृत्य निगडितेभ्यः जनेभ्यः साहाय्यं प्रददाति । केन्द्रीय गृह मन्त्रालयः अस्मिन् विषये सर्वेषां राज्यानां केन्द्रशासितप्रदेशानां च मुख्यसचिवान् उद्दिश्य पत्रम् अलिखत्। नूतनस्य नियमस्य अन्तर्गतं, प्रथमवारम् अपराधं कुर्वन्तः अपराधिनः अधिकतमस्य कारावासस्य तृतीयांशस्य सेवाः प्रदानानन्तरं बन्धपत्रे मुक्ताः भवितुम् अर्हन्ति।

## गृहमन्त्रिणा अमितशाहेन कृतं केन्द्रीयान्वेषणविभागद्वारा विकसितस्य निर्मितस्य च भारतपोल-इत्यभिनामधेयकस्य पटलस्य शुभारम्भः

हिमसंस्कृतवार्ताः । गृहमन्त्री अमितशाहः नवदिल्ल्याम् केन्द्रीयान्वेषणविभागद्वारा विकसितस्य निर्मितस्य च भारतपोल-इत्यभिनामधेयकस्य आन्तर्जालिकपटलस्य शुभारम्भं कृतवान्। अस्य भारतपोल् इत्याख्यस्य पटलस्योद्देश्यं इण्टरपोलइत्यनेन माध्यमेन अन्ताराष्ट्रिय-सहायतायै सर्वेषु अनुरोधेषु कार्याचरणं सुव्यस्थितं-करणमिति वर्तते। यस्मिन् रेडनोटिस इति सम्बद्धानि नैकानि प्रतिवेदनानि समाविष्टानि सन्तीति। अत्रावसरे गृहमन्त्री अमितशाहः स्वीयोद्बोधने अकथयत् यत् भारतपोल् इति अन्ताराष्ट्रिय-स्तरीयं निरीक्षणं नवीनं युगं प्रति नेष्यति। साम्प्रतम् अन्वेषण-विभागाः आवश्यक-सूचनाः प्राप्तुं इण्टरपोल इत्यनेन सङ्गटनेन संयोजिताः भवितुं शक्नुवन्ति। श्रीशाहः अग्रे अवोचत् यत् अनेन पदक्षेपेण आतङ्कवादसम्बद्धेभ्यः अपराधेभ्यः मादकपदार्थेभ्यः इत्यादिभ्यः प्रसङ्गेभ्यः निवारणं मेलिष्यति।

## सुभाषितम्

हर्तुर्न गोचरं याति,
दत्ता भवति विस्तृता।
कल्पान्तेऽपि न या नश्येत्,
किमन्यद्विद्यया विना।।

हिन्द्यर्थः- जो चोरों को दिखाई नहीं पड़ता, किसी को देने से जिसका विस्तार होता है, प्रलय काल में भी जिसका विनाश नहीं होता, विद्या के अतिरिक्त ऐसा अन्य कौन सा द्रव्य है?

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## अत्याधुनिक-स्वदेशिक-प्रौद्योगिकीनां विकासाय, विनिर्माण-क्षमतानां निर्माणाय च बलं प्रदत्तवान् वायुसेनाध्यक्षः

हिमसंस्कृतवार्ताः। वायुसेनाध्यक्षः एयर्-चीफ्-मार्शलू ए. पी. सिंहः अत्याधुनिक-स्वदेशिक-प्रौद्योगिकीनां विकासाय, विनिर्माण-क्षमतानां निर्माणाय च बलं प्रदत्तवान्। असौ अवदत् यत् सप्तचत्वारिंशदधिक-द्विसहस्रतमे वर्षे विकसित-भारतस्य लक्ष्यं साधयितुं रक्षाक्षेत्रस्य एयरोस्पेस इत्येतस्य क्षेत्रस्य च प्रमुखं योगदानं भविष्यति। एतद् वक्तव्यम् असौ अद्य नवदिल्ल्यां 'atma nirbharta in aerospace way ahead' इत्येतस्मिन् विषये आयोजिते एकविंशतितमे सुब्रोतो-मुखर्जी-सम्मेलने प्रदत्तवान्।

# Tibet Earthquake - तिब्बतदेशे भूकम्पे सति

## दलाईलामा दुःखं प्रकटितवान्



हिमसंस्कृतवार्ताः- धर्मशाला। तिब्बतदेशस्य डिंगरीस्थाने मंगलवासरे प्रातःकाले भूकम्पस्य दुःखदवार्तायां तिब्बतीधर्मनेता दलाईलामा अतीव दुःखं प्रकटितवान्। सः आधिकारिकजालपुटे सन्देशं कृतवान्। स्वसन्देशे सः लिखितवान् यत् भूकम्पेन ९३ जनाः प्राणान् त्यक्तवन्तः, अन्ये बहवः अपि घातिताः अभवन्। मंगलवासरे प्रातःकाले तिब्बतदेशे डिंगरीक्षेत्रस्य परिसरेषु च आगतस्य विनाशकारीभूकम्पस्य विषये ज्ञात्वा अतीव दुःखितः। अनेन अनेकेषां प्राणानां हानिः, बहवः घातिताः, गृहाणां सम्पत्तिनां च विस्तृतक्षतिः अभवत्। सन्देशस्य समाप्तौ लिखितम् "येषां प्राणहानिः तेषां कृते, प्रार्थयामि ये क्षतिग्रस्ताः च" तेषां शीघ्रं स्वस्थतां कामयामि इति।

# Earthquake: हिमाचलस्य मण्डीमण्डले भूकम्पनम्, तीव्रता ३.४ आसीत्, अधुना काऽपि क्षतिः न ज्ञाता

हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी। हिमाचलप्रदेशस्य मण्डीमण्डले मंगलवासरे भूकम्पनम् अभवत्। सायं ५:१४ वादने भूकम्पः अभवत्। भूकम्पस्य तीव्रता रिक्टर-मापने ३.४ इति अनुमानितम्। भूकम्पस्य केन्द्रं पञ्चकिलोमीटर भूमिगतं मापितम् आसीत्। सम्प्रति एतेषां कम्पानां कारणेन कस्यापि क्षतिः न अभवत् इति सूचना वर्तते।

# HMPV VIRUS - हिमाचले

## एच.एम.पी.वी. विषाणोः कियत् संकटम्?



हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः। कर्नाटकराज्ये सद्यः एव मानवमेटान्यूमोविषाणोः (एचएमपीवी) प्रकरणानाम् विषये मंगलवासरे सर्वेषां राज्यानां केन्द्रीयप्रदेशानां च स्वास्थ्यसचिवैः सह केन्द्रीयस्वास्थ्यसचिवस्य अध्यक्षतायां सभा आयोजिता। अस्मिन् सत्रे केन्द्रस्य स्वास्थ्यसचिवः अवदत् यत् ह्यूमन मेटाप्न्यूमोविषाणुः एकः सामान्यः विषाणुः अस्ति यः अधिकतया बालकेषु, प्रौढेषु, दुर्बलप्रतिरक्षायुक्तेषु जनेषु च प्रसरति। भारतसर्वकारेण उक्तं यत् एषः सामान्यः विषाणुः अस्ति, अतः आतङ्कस्य आवश्यकता नास्ति। भारते पूर्वमपि अस्य विषाणुना संक्रमणं जातम्। अस्य मुख्यलक्षणं कासः, ज्वरः, नासिकासंकोचः, तीव्रप्रसङ्गेषु श्वासप्रश्वासयोः क्षुब्धता इत्यादयः सन्ति तथा च ब्रोंकाइटिस, निमोनिया च भवितुम् अर्हति। एषः विषाणुः एकस्मात् व्यक्तितः अन्यतमं प्रति कासः, श्वासः, हस्तप्रहारः इत्यादिभिः प्रसरति। अयं विषाणुः किमपि गम्भीरं रोगं न जनयति। उपर्युक्तलक्षणस्य सन्दर्भे समीपस्थं स्वास्थ्यकेन्द्रं गत्वा स्वस्य परीक्षणं करणीयम्। भारतसर्वकारेण आयोजितायाः सभायाः अनन्तरं हिमाचलप्रदेशस्य स्वास्थ्यसचिवस्य अध्यक्षतायां सर्वेषां चिकित्सामहाविद्यालयानाम् प्राचार्यैः, सर्वेषां मण्डलानां मुख्यचिकित्साधिकारिभिः, सर्वेषां चिकित्साधीक्षकैः च सह आभासीय- सभा आयोजिता। सभायां स्वास्थ्यसचिवेन मार्गदर्शिकाः प्रसारिताः यत् इन्फ्लूएन्जा अथवा गम्भीरतीव्रश्वसनसिण्ड्रोमस्य सर्वेषां प्रकरणानाम् निरीक्षणं करणीयम्।

### किमस्ति मानवमेटा-न्यूमोविषाणुः (HMPV)?

➢ मानवस्य मेटोप्न्यूमोविषाणुः एच. एम. पी. वी इति अपि ज्ञायते यः मानवस्य श्वसनतन्त्रं प्रभावितं करोति। प्रथमवारं २००१ तमे वर्षे अस्य परिचयः अभवत्। ततः नीदरलैण्डदेशस्य वैज्ञानिकाः तस्य आविष्कारं कृतवन्तः। एषः पैरामाइक्सोविरीडे परिवारस्य एकः विषाणुः अस्ति।

> अन्येषां श्वसनविषाणुना इव संक्रमितजनानाम् कासस्य, श्वासस्य च समीपे स्थित्वा अपि अयं प्रसरति।

> केषुचित् अध्ययनेषु विश्वसितं यत् अयं विषाणुः विगतषड्दशकेभ्यः विश्वे वर्तते।

### एच. एम. पी. वी. विषाणुना कः कियत्पर्यन्तं प्रभावितः भवति?

> अनेन मुख्यतया बालकाः प्रभाविताः भवन्ति। परन्तु दुर्बलप्रतिरक्षायुक्तेषु जनेषु वृद्धेषु च अस्य प्रभावः अभिलेखितः अस्ति।

> अस्य विषाणुकारणात् जनाः शीत- कास- ज्वर- कफादिभिः पीड़िताः भवितुं शक्नुवन्ति। अधिकगम्भीरेषु कण्ठस्य, श्वसनमार्गस्य च अवरोधात् जनानां मुखात् वीटीध्वनिः अपि श्रूयते।

> केषुचित् गम्भीरतरेषु प्रकरणेषु अयं विषाणुः जनान् ब्रोंकिओलाइटिस (फेफड़ों में ऑक्सीजन ले जाने वाली नली में सूजन) निमोनिया (फुफ्फुसानां जलेन पूर्णं) च जनयितुं शक्नोति अस्य कारणात् संक्रमितानां जनानां चिकित्सालये प्रवेशः करणीयः भवेत्।

> यतो हि तस्य लक्षणं कोरोना-संक्रमणं सामान्य- फ्लू- सदृशं भवति, तस्मात् द्वयोः भेदं वक्तुं कठिनम् अस्ति। परन्तु यत्र प्रत्येकं ऋतौ कोरोना महामारी प्रसृता। यत्र एचएमपीवी अद्यावधि मुख्यतया ऋतुसंक्रमणं मन्यते। परन्तु अनेकेषु स्थानेषु आवर्षम् अस्य उपस्थितिः अभिलेखिता अस्ति।

> कोरोना इत्येतत् विहाय अस्य विषाणुना श्वसनमार्गस्य उपरितनभागयोः संक्रमणस्य संकटः भवितुम् अर्हति।

> सामान्येषु सति अस्य विषाणोः प्रभावः त्रि-पञ्चदिनानि यावत् भवति।

# Medical Science : अग्राशयस्य कर्करोगस्य चिकित्सायां शल्यक्रियारहिता तकनीकी प्रभावी इति शोधकार्ये ज्ञातम्

हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः। अग्राशयस्य कर्करोगविषये कृतेषु शोधकार्य्येषु वैद्याः महतीं सफलतां प्राप्तवन्तः। अग्राशयस्य कर्करोगेण पीडितानां रोगिणां चिकित्सायां केमो, रेडियोथेरेपी इत्यादीनि अशल्यचिकित्सा अधिकानि प्रभाविणः भवन्ति। हिमाचल- पञ्जाब- हरियाणा- प्रदेशेभ्यः ५८ तः ६१ वर्षाणि यावत् आयुषः रोगिणां विषये कृतेषु शोधकार्य्येषु एतत् प्रकाशितम् अस्ति। अग्राशयस्य कर्करोगः गम्भीरः रोगः अस्ति। अस्मिन् रोगे अग्राशये कर्करोगकोशिकानां विकासः भवति। मृत्योः चतुर्थं प्रमुखं कारणम् अस्ति। आईजीएमसी, पीजीआई इत्येतयोः वैद्यदलेन २०१९ तः २०२२ पर्यन्तं परीक्षणरूपेण ८० रोगिणां विषये शोधः कृतः। आईजीएमसी इत्यस्य सर्जिकलगैस्ट्रो-विभागस्य सहायकप्राध्यापकः डॉ. विपिनकुमारशर्मा इत्यनेन उक्तं यत् अ-शल्यचिकित्सा (एनएसीआरटी) क्रियमाणाः ४१ रोगिणः, शल्यक्रियां कुर्वन्तः ३९ रोगिणः च द्वयोः समूहयोः विभक्ताः आसन्। रेडियो-रसायनचिकित्सायाः माध्यमेन ४१ रोगिणां चिकित्सा कृता। द्वितीयसमूहस्य रोगिणां परीक्षणानन्तरं प्रत्यक्षं शल्यक्रिया अभवत्। यदि प्रथमं रोगिणाम् अशल्यचिकित्सा क्रियते तर्हि तेषां निवृत्तिः भवितुम् अर्हति इति प्रकाशितम् अस्ति। अपरपक्षे एतत् शोधपत्रं जर्नल- ऑफ- कैंसर- रिसर्च एण्ड थेरेपिटिक्स इति पत्रिकायाम् अपि प्रकाशितम्। परन्तु अस्य पद्धतेः लाभं स्थापयितुं बहुकेन्द्रितस्य अध्ययनस्य आवश्यकता अद्यापि वर्तते इति विशेषज्ञाः मन्यन्ते।



## अग्राशयः किम्?

अग्राशयः एकः लघुग्रन्थिः अस्ति यः एन्जाइम्स्, हार्मोन इति च उत्पादयति ये पाचनकार्य्ये सहायकाः भवन्ति। अग्राशयस्य कर्करोगस्य लक्षणं प्रायः प्रारम्भिकपदे न दृश्यते इति वैद्याः वदन्ति। यथा यथा कर्करोगः प्रगच्छति तथा तथा विविधानि लक्षणानि दृश्यन्ते। एतादृशाः रोगिणः आईजीएमसी इत्यस्य शल्यक्रियाविभागे आगत्य चिकित्सां कर्तुं शक्नुवन्ति इति डॉ. विपिनकुमारशर्मा अवदत्।

## रोगस्य लक्षणम्



अग्राशयकर्कटरोगिणां प्रायः पीतरोगस्य समस्या भवति इति डॉ. शर्मा अवदत्। वाक् नेत्रे च पीतं भवति। एतदतिरिक्तं उदरवेदना, वजनक्षयः, बुभूक्षाक्षयः, वमनं, श्रान्तता, पाचनसमस्याः च भवन्ति। रोगिणां रक्ते शर्करायाः स्तरः वर्धते। मधुमेहस्य कारणं च भवति।

## हिमाचलवार्ताः : हिमाचले ३३ सहस्रं ६०९ मतदातॄणां वृद्धिः




**हिमसंस्कृतवार्ताः- शिमला।** निर्वाचनविभागस्य विशेषप्रचारस्य फलं हिमाचले अभवत्। विभागस्य प्रचारकाले ३४ सहस्र २३४ नूतनाः मतदातारः पञ्जीकृताः सन्ति। तेषु ३३ सहस्र ६०९ मतदातारः १८-१९ वर्षाणां आयुवर्गे सन्ति। मुख्यनिर्वाचनपदाधिकारी नन्दितागुप्ता अवदत् यत् अनुमोदितकार्यक्रमानुसारं भारत- निर्वाचन-आयोगेन राज्यस्य सर्वेषां विधानसभाक्षेत्राणां कृते फोटोमतदातासूचीनां विशेषसारांशपुनरीक्षणस्य कार्यं जनवरीमासस्य प्रथमदिनाङ्के सम्पन्नम्। प्रारूपस्य प्रकाशनसमये राज्यस्य सर्वेषां ६८ विधानसभाक्षेत्राणां फोटो मतदातासूचौ कुलम् ५६ लक्षं २८ सहस्रं १८९ मतदातॄणां नामानि पञ्जीकृतानि आसन्। पुनरीक्षणकाले आहत्य ६८ सहस्रं ४१४ मतदातारः पञ्जीकृताः सन्ति। संशोधनकाले विभागेन १८-१९ वर्षाणां छात्राणां सुविधायै राज्यस्य ४०७ सर्वकारीयनिजीशिक्षणसंस्थासु १३ नवम्बर २६ नवम्बर दिनाङ्के मतदातापञ्जीकरणस्य विशेषं अभियानं कृतम् आसीत्। अस्मिन् काले १८-१९ वर्षाणाम् आयुवर्गस्य ३३ सहस्रं ६०९ नवमतदातॄणां नामानि पञ्जीकृतानि। एतदतिरिक्तं मृत्योः, स्थानपरिवर्तनं, द्विगुणपञ्जीकरणस्य कारणेन मतदातासूचीभ्यः ३४ सहस्राणि २६० मतदातॄणां नामानि निष्कासितानि सन्ति। सः अवदत् यत् अधुना राज्यस्य सर्वेषां विधानसभाक्षेत्राणां फोटो मतदातासूचौ आहत्य ५६ लक्षं ६२ सहस्रं ४२३ सामान्यमतदातारः पञ्जीकृताः सन्ति। तेषु २८ लक्षं ५९ सहस्रं ७९ पुरुषाः, २८ लक्षं ३ सहस्रं ३०५ महिलाः ३९ तृतीयलिङ्गमतदातारः च सन्ति। मतदातासूचौ ३५ प्रवासी भारतीयमतदातारः सन्ति। एतदतिरिक्तं राज्ये ६३ सहस्रं ३९४ सेवायोग्यमतदातारः सन्ति। मतदातॄणां लिंगानुपातः ९८१ अस्ति, यदा राज्यस्य जनसंख्यालिंगानुपातः ९७६ अस्ति। राज्यस्य सर्वेषु विधानसभाक्षेत्रेषु सुलहक्षेत्रे अधिकतमं मतदाता संख्या एकलक्षपञ्चसहस्रं ८८२, यदा तु लाहौल- स्पीतौ न्यूनतमा मतदाता संख्या २५ सहस्राणि ५८९ सन्ति सूचीनाम् अन्तिमप्रकाशनस्य अवसरे ६ जनवरी दिनाङ्के निर्वाचनविभागस्य मुख्यालये अपि सभायाः आयोजनं कृतम्।

## गुजरातराज्यसंस्कृतविभागस्योपाध्यक्ष-रूपेण नियुक्तः डॉ.पङ्कज त्रिवेदी

**हिमसंस्कृतवार्ताः - - जगदीशडाभी (गुजरातम्)**



गुजरातराज्यसर्वकारेण स्थापितस्य संस्कृत विभागस्य उपाध्यक्षरूपेण श्रीमान् पंकज त्रिवेदि वर्यः नियुक्तः। एते साम्प्रतं विभिन्नान् दायित्वान् वहन्तः वर्तन्ते। संस्कृतभारत्यां सौराष्ट्रप्रान्तमन्त्रि पदम् अलङ्कुर्वाणाः विद्यन्ते। महिला महाविद्यालयस्य प्राचार्यरूपेण तिष्ठति। श्रीसोमनाथ विश्वविद्यालये शैक्षणिकविभागे सदस्याः सन्ति । गुजरातसाहित्य अकादमीमध्ये अपि कार्यं कृतवन्तः। विभिन्नेषु अन्ताराष्ट्रिय-राष्ट्रियगोष्ठीषु भागम् अवहन् । इमे संस्कृतजगति कृतभूरिपरिश्रमाः वर्तन्ते। अस्य विभागस्य अध्यक्षरूपेण डॉ हिमाञ्शु पालिवाल महोदयाः सन्ति। एतेषां दिशानिर्देशने संस्कृतकार्यम् अभिवर्धताम् अविरतम् इति आशासे।

## Mahakumbh 2025 : हरितमहाकुम्भे सहस्राधिकाः पर्यावरणसंरक्षणकार्यकर्तारः एकत्रिताः भविष्यन्ति

### पर्यावरणसंरक्षणविषये महाकुम्भपरिसरे हरितमहाकुम्भस्य आयोजनं भविष्यति

**हिमसंस्कृतवार्ताः - महाकुम्भनगरम्, 08 जनवरी।** महाकुम्भप्रयागराजः संस्कृति-आध्यात्म-सङ्गमे पर्यावरण-संरक्षणस्य सन्देशं प्रसारयति । अत्र 31 जनवरी दिनाङ्के हरितमहाकुम्भस्य आयोजनं भविष्यति, यस्मिन् देशस्य सहस्राधिकाः पर्यावरणजलसंरक्षणकार्यकर्तारः भागं गृह्णन्ति। शिक्षा संस्कृति उत्थान न्यासस्य 'ज्ञान महाकुम्भ - 2081' कार्यक्रममाला अन्तर्गत प्रयागराज महाकुम्भे अयं विशेषकार्यक्रमः आयोजितव्यः। उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः ज्ञानमहाकुम्भस्य मुख्यः संरक्षकः अस्ति ।



### राष्ट्रीयस्तरीयचर्चा

हरितमहाकुम्भस्य अन्तर्गतं प्रकृतेः, पर्यावरणस्य, जलस्य, स्वच्छतायाः च सम्बद्धेषु विषयेषु राष्ट्रियस्तरस्य चर्चा भविष्यति। प्रकृतेः पञ्चतत्त्वानां सन्तुलनं तेषां सह सम्बद्धानां आव्हानानां च विषये विशेषज्ञाः स्वमतानि अनुभवानि च सार्वजनिकं करिष्यन्ति । एतदतिरिक्तं महाकुम्भम् आगच्छन्तं जनान् पर्यावरणसंरक्षणं स्वच्छतां च विषये अवगतं करणं, अस्मिन् विषये प्रचलति अभियानं च विषये चर्चा अपि भविष्यति।

### विशेषज्ञैः सह भक्ताः अपि सम्मिलिताः भविष्यन्ति

पर्यावरणसंरक्षणकार्यकर्ता रामबाबूतिवारी हरितमहाकुम्भस्य सज्जता प्रचलति इति उक्तवान्। देशस्य सर्वेभ्यः पर्यावरण-प्रकृति-संरक्षण-सम्बद्धाः कार्यकर्तारः विशेषज्ञाः च अस्मिन् भागं गृह्णन्ति । महाकुम्भे भागं ग्रहीतुम् आगच्छन्तः भक्ताः पर्यावरणसंरक्षणस्य स्वच्छतायाश्च अभियानेन सह कथं सम्बद्धाः भवेयुः इति विषये अपि विस्तृतचर्चा चर्चा च भविष्यति।

## स्वास्थ्यविभागदलं निरन्तरं महाकुम्भ-भ्रमणं कुर्यात्, जन-स्थितेः विषये पृच्छां कुर्यात्,- मुख्यमन्त्री योगी




**> तीव्रशीतस्य मध्ये सामान्यजनानाम् आरोग्यरक्षणस्य दृढव्यवस्थाः भवेयुः, स्वास्थ्यव्यवस्था सजगः एव तिष्ठेत्- मुख्यमन्त्री**

**> मुख्यमन्त्रीनिर्देशाः अन्वेषणं वा औषधानाम् उपलब्धता वा सर्वं क्रमेण भवेत्**

**> मुख्यमन्त्री ऋतुरोगनिवारणार्थं सज्जतायाः समीक्षां कृतवान्, आवश्यकमार्गदर्शिकाः दत्तवान्**

**हिमसंस्कृतवार्ताः - लखनऊ 08 जनवरी।** मुख्यमन्त्री योगी आदित्यनाथः शीतऋतौ सामान्यजनानां स्वास्थ्यसुरक्षां सुनिश्चित्य दृढव्यवस्थां कर्तुं निर्देशं दत्तवान्। मङ्गलवासरे वरिष्ठाधिकारिभिः सह महत्वपूर्णसमागमे मुख्यमन्त्री उक्तवान् यत् सम्पूर्णे राज्ये तीव्रशीतवायुः वर्तते। शीततरङ्गः प्रचलति। एषः समयः यदा वृद्धानां, बालानां, गम्भीररोगग्रस्तानां जनानां च सुरक्षायाः कृते विशेषसावधानीः करणीयाः। शीत-कास-श्वसन-रोगसम्बद्धानां रोगिणां संख्यायां सम्भावना वृद्धिः भवति । एतादृशे परिस्थितौ स्वास्थ्यव्यवस्थायाः सजगता आवश्यकी अस्ति। मुख्यमन्त्री निर्देशं दत्तवान् यत् सर्वेषु सर्वकारीयचिकित्सालयेषु रोगिणां उत्तमचिकित्सासुविधाः प्राप्तव्याः। परीक्षणं वा औषधानाम् उपलब्धता वा सर्वं सिद्धं भवेत्। सामान्यजनस्य चिन्ता न कर्तव्या। महाकुम्भे तीर्थयात्रिकाणां स्वास्थ्यचिकित्सासुविधानां समीक्षां कुर्वन् मुख्यमन्त्री अवदत् यत् सर्वेषु क्षेत्रेषु चिकित्सायाः पर्याप्तव्यवस्था भवितुमर्हति। एम्बुलेन्सस्य सुविधा उपलब्धा भवेत्। शीत-कास- ज्वरः इत्यादयः ऋतुसमस्याः वा अन्यः कोऽपि गम्भीरः रोगः भवतु, सर्वेषां सम्यक् चिकित्सासाहाय्यं प्राप्तव्यम् । सः अवदत् यत् रोगिणां कृते सहायतां दातुं स्वास्थ्यविभागस्य दलेन सर्वेषु क्षेत्रेषु निरन्तरं भ्रमणं कृत्वा जनानां स्थितिविषये जिज्ञासा करणीयम्, आवश्यके सति तेभ्यः समुचितं चिकित्सासहाय्यं प्रदातव्यम्।

## सामान्यज्ञानप्रश्नोत्तरी-

**हिमसंस्कृतवार्ताः,**
**डॉ. विवेक शर्मा, जोगिन्द्रनगरम्**

प्रश्नः 1. ब्रेबोर्न- क्रीडाङ्गणम् (क्रिकेट) कुत्र अस्ति?
उत्तरम् : मुम्बई (महाराष्ट्रे)
प्रश्नः 2. 'वाक्यपदीयम्' इत्यस्य रचयिता कः अस्ति?
उत्तरम् - 'भर्तृहरिः'।
प्रश्नः 3. 'सुखं प्राप्तः' इत्यस्य समस्त पदं किम्?
उत्तरम्- सुखप्राप्तः। (द्वितीयातत्पुरुषः)
प्रश्नः 4. 'हरीशः' इत्यस्य सन्धि- विच्छेदं कुरुत-
उत्तरम्- 'हरि + ईशः'।
प्रश्नः 5. विजयनगरः कस्य राज्यस्य राजधानी आसीत्?
उत्तरम्- कर्नाटकस्य।

## पत्न्या सह अधिकं हास्यं न कर्तव्यम्

**हास्यकणिका विशेषज्ञा- विदुषी अग्रवाल**
**प्रेरणास्त्रोतः- महाभागः महेन्द्रमिश्रमहोदयः**

कार्यालये पतिं दूरवाणीं कृत्वा पत्नी पृष्टवती
पत्नी- भोजनं कृतवान्?
पतिः- भोजनं कृतवती?
पत्नी- अहम् पृच्छामि।
पतिः (विनोदं कुर्वन्)- अहम् पृच्छामि।
पत्नी- भवान् मां प्रतिलिपिं करोति?
पतिः (पुनः विनोदं कुर्वन्)- भवती मां प्रतिलिपिं करोति? पत्नी क्रुद्धा अभवत्। तदनन्तरं विचारं कृत्वां, प्रसन्ना भूत्वा उक्तवती-
पत्नी- आवां शॉपिङ्ग कर्तुं गच्छावः।
पतिः- अहं भोजनं कृतवान्



# संस्कृतादेव बह्वीनां भाषाणाम् उत्पत्तिर्जाता-वाचस्पतिमिश्रः

**हिमसंस्कृतवार्ताः- गोपालकृष्णमिश्रः**

संस्कृतभाषा सर्वभाषाणां जननी इति मन्यते। एषा भाषा न केवलं भारतस्य सांस्कृतिकनिक्षेपः, अपि तु तस्याः शब्दाः, व्याकरणं, संरचना च अनेकासु भाषासु प्रभावं कृतवती। अद्यापि हिन्दी- मराठी- गुजराती- तमिल- तेलुगु- आङ्ग्ल- जर्मनप्रभृतिषु भाषासु संस्कृतशब्दाः दृश्यन्ते। संस्कृतस्य प्रभावः अस्माकं दैनन्दिनकार्यक्रमे अपि स्पष्टतया दृश्यते। सप्ताहस्य सप्तनामानि संस्कृतात् उत्पन्नानि सन्ति। सोमवासरः चन्द्रेण (सोमेन) सह सम्बद्धः। मंगलवासरः मंगलग्रहेण सम्बद्धः। बुधवासरः बुधग्रहात्। गुरुवासरः गुरुणा (बृहस्पतिना)। शुक्रवासरः शुक्रात् शनिवासरः शनितः। रविवासरः सूर्येण सम्बद्धः। मासानां ग्रहनक्षत्राणां च उल्लेखः संस्कृते एव प्राप्यते। संस्कृते द्वादशमासानां नामानि अपि वैदिकज्योतिषशास्त्रेण, खगोलशास्त्रेण च प्रेरितानि सन्ति। एतेषां नामानां आधारः सूर्यचन्द्रयोः गतिः- चैत्रवैशाखज्येष्ठप्रभृतयो मासाः भवन्ति। संस्कृते ग्रहनक्षत्राणां च विस्तृतं वर्णनम् अस्ति। सूर्य- चन्द्र- मङ्गल- बुध- बृहस्पति- शुक्र- शनिप्रभृतीनां ग्रहाणां नामानि संस्कृतात् गृहीतानि सन्ति। सप्तविंशतिः नक्षत्राणि (अश्विनी, भरणी, कृत्तिका इत्यादीनि) वेदेषु उल्लिखितानि सन्ति।

विश्वस्य विषये विस्तृता सूचना संस्कृतसाहित्ये दत्ता अस्ति। "सूर्यसिद्धान्तः" "आर्यभट्टीयम्" इत्यादयः ग्रन्थाः प्राचीनभारतीयखगोलशास्त्रेण सम्पूर्णजगति दिङ् दत्ता इति प्रमाणम् अस्ति। ब्रह्माण्डं जगत् "लोकः", "अन्तरिक्षम्" इत्यादिभिः नामभिः सम्बोधितम् अस्ति। इत्येवं प्रकारेण स्वेन वक्तव्येन उत्तरप्रदेशसंस्कृतसंस्थानस्य अध्यक्षचरेण संस्कृतभारत्याः पश्चिमोत्तरक्षेत्रस्य विद्वत्परिषद्प्रमुखेण व्याकरणशास्त्रस्य लोकमान्येन विदुषा "डॉ. वाचस्पतिमिश्रेण" संस्कृते अनेकेषां विषयाणाम् उदाहरणानि प्रदाय ग्रन्थेषु विश्वस्य, खगोलशास्त्रस्य, मानवजीवनस्य च जटिलतायाः विषये विशेषतया चर्चा कृता। तदीयं वक्तव्यं वैज्ञानिकं दार्शनिकं च अस्ति। अमुना उदीरितं यत् संस्कृतं केवलं धार्मिकाध्यात्मिकक्षेत्रपर्यन्तमेव सीमितं न कृत्वा व्यवहारिक- वैज्ञानिक- सन्दर्भेष्वपि मन्तव्यम्। सः अवदत् यत् संस्कृतभाषा न केवलं प्राचीनभारतीयसंस्कृतेः आत्मा अस्ति, अपि तु विज्ञानस्य, खगोलशास्त्रस्य, साहित्यस्य च क्षेत्रेषु अस्माकं अमूल्यो न्यासो वर्तते। इयं भाषा अतीतस्य वैभवस्य, भविष्यस्य सम्भावनायाः च संगमः अस्तीति प्रतिपादयता अमुना विदुषा शिक्षार्थिनः अभिमुखीकृताः। शिक्षार्थिनश्चापि बौद्धिकसत्रस्य वक्त्रे स्वम् अनुभवं श्रावितवन्तः। बौद्धिके सत्रेऽस्मिन् कुलदीप मैन्दोला, संगठनमंत्री गौरव शास्त्री, वर्गाधिकारी आचार्यः कीर्तिवल्लभ मैन्दोला, ज्योतिः, संतोषः, सलोनी, आनंदजोशी, राकेशसेमवालः प्रभृतयः कार्यकर्तारः आसन्।




## परतन्त्रतायाः लेशमात्रमपि यदभिज्ञानं, तद्दूरीकरणं संस्कृतेन एव सम्भवति : डॉ. सुशीलकुमारः

प्रबोधनवर्गस्य सप्तमे दिवसे वन्दनासत्रे श्रीमान् देवेन्द्रशर्मा दीपप्रबोधनं कृतवान्। बौद्धिकसत्रे संस्कृतभारती देहलीप्रान्तस्य सहप्रान्तमन्त्री डॉ. सुशीलकुमारः शिक्षार्थिनां कृते उद्बोधनं कृतवान्। महोदयेन संस्कृतसम्भाषणशीलानां परस्परं परिचयस्य सम्पर्कस्य च विषये उक्तम्। डॉ शर्मणा उक्तं यद् येन सह अस्माकं परिचयः भवति तस्य गुणानां सामर्थ्यस्य च अस्माकं ज्ञानं भवति। तेन एव अस्माकम् अपि सामर्थ्यं वर्धते। तेन वयं राष्ट्रदेवस्य आराधनं सेवनं च कर्तुं शक्नुमः। मुख्यतः सामर्थ्यानि पञ्चविधानि इति चिन्त्यते। जनधनज्ञानतपश्चरित्राणि इति सर्वेषामपि बलानां वर्धनं परिचयद्वारा भवति। अस्माकम् इतिहासे अनेके तादृशाः महापुरुषाः अभवन् येषां तपः कारणतः अस्माकं मनस्सु वयं भारतीयाः इति गर्वानुभूतिः भवति। संस्कृतभारती सङ्घटनरूपेण यदा विचारस्य आरम्भः जातः तदा चत्वारः छात्राः आरम्भं कृतवन्तः। सम्प्रति विश्वस्य अनेकेषु देशेषु सम्भाषणान्दोलनम् अनेन क्रियते। पूर्वस्माकं पूर्वजैः कष्टं सोढ्वापि परम्परा संरक्षिता इति महत्सौभाग्यम्। महोदयेन उक्तं यत् परतन्त्राकाले अस्माकं निजभाषायाः हानिः या जाता, तस्याः पुनरुत्थानं कर्तुं युवानः युवत्यः कार्यकर्तारः सङ्कल्पं स्वीकुर्मः। यथा मन्दिरे नूतनपुष्पाणि एव अर्प्यन्ते तद्वदेव यूनां नेतृत्वद्वारा एतत्कार्यं सारल्येन भविष्यति। तेन कोटिशः भारतीयानाम् एवम् आत्मविश्वासः भवति यत् मम भाषा मम मुखे अस्ति इति । ध्यातव्यं यद् देहलीप्रान्ते प्रबोधनवर्गस्य आयोजनं प्रथमदिनाङ्कतः जायमानम् अस्ति सम्पूर्तिसत्रञ्च एतस्य श्वः भविष्यति।

# KKSU Ramtek: कविकुलगुरुकालिदास-संस्कृतविश्वविद्यालयस्य

## वेदङ्गज्योतिषविभागेन आकाश-दर्शनकार्यक्रमस्य आयोजनम्




**हिमसंस्कृतवार्ताः - रामटेकम्।** कविकुलगुरु-कालिदाससंस्कृतविश्वविद्यालयस्य वेदङ्गज्योतिषविभागेन ७-०१-२०२५ दिनाङ्के सायं ०४:०० वादनतः सायं ०७:३० वादनपर्यन्तं विश्वविद्यालयस्य रामटेक परिसरे आकाशदर्शनकार्यक्रमः आयोजितः। अस्मिन् कार्यक्रमे विशेषज्ञानां सान्निध्ये ग्रहालयस्य दूरदर्शनस्य च माध्यमेन आकाशग्रहनक्षत्राणां दर्शनं जातम् ।

एषः खगोलशास्त्रप्रेमिणां कृते विशेषः दिवसः आसीत्। सायं ७ वादनपर्यन्तं युगपत् सप्तचन्द्राः दृष्टाः। एषः सौरमण्डले सप्तग्रहदर्शनस्य दुर्लभः अनुभवः । कालिदाससंस्कृतविश्वविद्यालयस्य ज्योतिषविभागेन अस्य अद्वितीयदृष्टेः विशेषतया सज्जता कृता आसीत् तथा च अस्मिन् आकाशदर्शनकार्यक्रमे दूरदर्शीयन्त्रेण दूरबीनयन्त्रेण च आकाशग्रहाः नक्षत्राणि च दृश्यन्ते स्म।

अस्य कार्यक्रमस्य अध्यक्षता विश्वविद्यालयस्य कुलपतिः प्रो हरेराम त्रिपाठी अकरोत्।

कुलसचिवः डॉ. देवानंदशुक्लः, प्राचीनभारतीयविज्ञानं एवं मानविकी संकायस्य अधिष्ठाता प्रो कृष्णकुमारपाण्डेय,वेदांगज्योतिष विभागप्रमुखः डॉ.दिनकरः मराठे वेदांगज्योतिष विभागस्य प्राध्यापकः प्रो. प्रसाद गोखले, सहायकाचार्यः डॉ आशीष जे , डॉ. अम्बालिका सेठिया, डॉ. हृषिकेश साहू, श्री अनुजप्रदीपः शर्मा, सुश्री कल्याणी दहले आदय प्रमुखरूपेण उपस्थिताः आसन्।



# एकः सामान्यः विषाणुः अस्ति एच्एमपीवी इति स्वास्थ्यमन्त्री अवदत्- विभागः तस्य निवारणाय पूर्णतया सज्जः अस्ति

**हिमसंस्कृतवार्ताः- शिमला।**

स्वास्थ्यमन्त्रिणः डॉ. (कर्नल) धनीरामशाण्डिलस्य अध्यक्षतायां मानवमेटान्यूमोवायरस (HMPV) विषये स्वास्थ्याधिकारिभिः सह गोष्ठी कृता। सः अवदत् यत् एचपीएमवी सामान्यः विषाणुः अस्ति, अतः आतङ्कस्य आवश्यकता नास्ति। एषः नूतनः विषाणुः नास्ति, भारतसहितेषु विभिन्नेषु देशेषु २००१ तमवर्षात् प्रचलितः अस्ति। प्रतिवर्षं प्रौढाः बालकाः च अनेन विषाणुना प्रभाविताः भूत्वा स्वस्थतां प्राप्नुवन्ति। अस्मिन् वर्षे अपि भारते नियमितनिरीक्षणकाले एचपीएम-रोगस्य केचन प्रकरणाः ज्ञाताः परन्तु अधुना यावत् हिमाचले तस्य सम्बद्धः एकः अपि प्रकरणः न ज्ञातः।

स्वास्थ्यमन्त्री उक्तवान् यत् एचपीएमवी 'चिन्ताजनकः विषाणुः' नास्ति, अतः सामान्यविषाणुवत् व्यवहारः करणीयः यस्य निवारणं सुलभतया कर्तुं शक्यते। सः अवदत् यत् केन्द्रीय- स्वास्थ्य- मन्त्रालयसहितं राज्यस्वास्थ्यविभागः एच.पी.एम.वी. एतावता देशे सर्वत्र इन्फ्लूएन्जा- सदृशस्य रोगस्य, तीव्र- तीव्र- श्वसन- रोगस्य च प्रकरणाः सामान्यस्तरस्य एव सन्ति। हिमाचले अपि एतादृशेषु प्रकरणेषु असामान्यवृद्धिः न कृता। स्वास्थ्यमन्त्री उक्तवान् यत् अस्य विषाणोः सामान्यलक्षणं कासः, ज्वरः, नासिकासंकोचनं च सन्ति। अयं संक्रमणः कासः, श्वासः, स्पर्शः, हस्तप्रहारः वा कृत्वा प्रसरति। सः राज्यस्य जनान् सावधानाः भवेयुः इति अनुरोधं कृत्वा अवदत् यत् यदि कोऽपि कासस्य वा ज्वरस्य वा लक्षणं पश्यति तर्हि समीपस्थं स्वास्थ्यकेन्द्रं गत्वा स्वस्य परीक्षणं कृत्वा कस्यचित् सम्पर्कं परिहरन्तु इति। सः अवदत् यत् मुखावरणं धारयित्वा, समये समये फेनकेन हस्तप्रक्षालनं कृत्वा, कासं वा श्वासं वा कुर्वन् मुखं नासिकां च आच्छाद्य व्याधिः सति गृहे विश्रामं कृत्वा इत्यादिना एतत् संक्रमणं परिहर्तुं शक्यते। सः अवदत् यत् निकटभविष्यत्काले एचपीएमवी- प्रकरणानाम् उदयः भवति चेदपि स्वास्थ्यविभागः एतादृशप्रकरणानां निवारणाय पूर्णतया सज्जः अस्ति। सः अवदत् यत् राज्ये पर्याप्तस्वास्थ्यसंरचना, शय्यानां संख्या, आक्सीजनस्य, प्राणवायोकोषस्य च उपलब्धता सहितं सर्वविधाः सशक्ताः व्यवस्थाः सन्ति येन कस्यापि प्रतिकूलपरिस्थितेः निवारणं भवति। भारतसर्वकारेण समये समये निर्गतानां मार्गदर्शिकानां नियमानां च अनुसरणं कृत्वा एचपीएमवी- सन्दर्भे राज्यसर्वकारः आगामिरणनीतिं स्वीकुर्यात् इति सः अवदत्।